# ‘मनोगतम्’ - ०२.१४ ‘मन की बात(14वीं कड़ी)प्रसा.तिथिः-२६-जुलाई’२०२०

[भाषान्तरम् - डॉ.श्रुतिकान्त-पाण्डेयेन सम्भूय बलदेवानन्द-सागर-द्वारा]

मम प्रियाः देशवासिनः, नमस्कारः | अद्य जुलाई-मासस्य षड्विंशः दिवसः, अद्यतनोऽयं दिवसः अतितरां विशिष्टः | अद्य, ‘कारगिल-विजय-दिवसः’ अस्ति | एकविंश-वर्ष-पूर्वम् अद्यतने एव दिवसे कारगिल-युद्धे अस्मदीयाः सेनाः भारतीय-विजयस्य ध्वजम् उत्तोलितवत्यः |

सुहृदः, कारगिल-युद्धं यासु परिस्थितिषु अभवत्, भारतं तत् कदापि विस्मर्तुं नैव शक्नोति | पाकिस्तानेन महतीः समीहाः मनसि निधाय भारतस्य भूमिम् अधिग्रहीतुं, तथा च, निज-देशे प्रवर्त्तमानात् आन्तरिक-कलहात् ध्यानम् अपकर्षयितुं दुःसाहसम् आचरितम् | भारतं तदा पाकिस्तानेन साकं भद्रतर-सम्बन्धार्थं प्रयासरतम् अवर्त्तत, परञ्च प्रोक्तमस्ति -

“बयरू अकारण सब काहू सों | जो कर हित अनहित ताहू सों ||

अर्थात् दुष्टस्य स्वभावोऽयं यत् विनैव कारणम् असौ सर्वैः साकं शत्रुवद् आचरति | एतादृक्-स्वभाववन्तः जनाः, ये हितकारिणः सन्ति, तेषामपि हानिमेव चिन्तयन्ति अत एव भारतस्य मित्रतायाः उत्तरे पाकिस्तानेन पृष्ठोपरि छुरिका-प्रहारः प्रयतितः, परञ्च, ततः परं भारतस्य वीर-सेनाभिः यः पराक्रमः प्रदर्शितः, भारतेन नैजं यत् बलं प्रदर्शितम्, तत् अशेष-जगता दृष्टम् | भवन्तः कल्पयितुं शक्नुवन्ति – ऊच्छ्रिततरेषु पर्वतेषु स्थितः शत्रुः, तथा च, अधस्तात् युद्ध-निरताः अस्मदीयाः सेनाः, अस्मदीयाः वीराः भटाः, परञ्च, विजयः पर्वतस्य ऊच्छ्रिततायाः नैव - भारतीय-सेनानाम् ऊच्छ्रिततर-शीलस्य यथार्थ-वीरतायाः चाभवत् |

सखायः, तदवधौ, अहमपि कारगिल-गमनस्य अस्मदीय-भटानाञ्च वीरता-दर्शनस्य सौभाग्यम् अवाप्नवम्, तद्दिनं, मम जीवनस्य उत्कृष्टेषु अमूल्य-क्षणेषु अन्यतमम् | अहम् अवलोकयामि, अद्य अशेष-देशे जनाः कारगिल-विजयं स्मरन्ति |सामाजिक-सञ्चारमाध्यमेषु hashtag #courageinkargil-इत्यनेन साकं जनाः स्वीय-वीरान् प्रणमन्ति, ये हुतात्मनः सञ्जाताः तेभ्यः श्रद्धाञ्जलिम् अर्पयन्ति | अहम्, अद्य, सर्वेषां देशवासिनां, पक्षतः एतैः वीर-भटैः साकमेव, ताः वीर-जननीः अपि नमामि, याः मातुः भारत्याः सूनृतान् सुतान् प्रसूतवत्यः |

देशस्य नवयुवकान् साग्रहं कथयामि यत्ते अद्य आदिनं कारगिल-विजय-सम्बद्धानाम् अस्मदीयानां वीर-सैनिकानां कथाः, वीर-जननीनां त्याग-विषयं चाधृत्य मिथः कथयेयुः सम्विभाजयेयुः च |

अहं, सखायः, अद्य भवतः साग्रहं कथयामि | एकं Website-इति जालस्थानमस्ति - www.gallantryawards.gov.in, भवन्तः नूनमत्र गच्छेयुः | तत्र भवन्तः, अस्माकं वीराणां पराक्रमि-योद्धृणां, तेषाञ्च पराक्रमस्य विषये, अनेकाः सूचनाः प्राप्स्यन्ति, तथा च, यदा भवन्तः, तासां सूचनानां विषये स्वीय-मित्रैः साकं चर्चिष्यन्ति - तेषां कृतेऽपि अयं प्रेरणा-विषयो भविता | भवन्तः नूनमिदं जालस्थानं गच्छेयुः, तथा च, अहन्तु कथयामि, पौनःपुनिकं गच्छन्तु |

सखायः, कारगिल-युद्धावसरे अटल-महोदयः रक्तदुर्गात् यत् अकथयत्, तत्, अद्यापि अस्माकं सर्वेषां कृते सुबहु प्रासङ्गिकम् | अटल-महोदयः, तदा, महात्म-गान्धिनः अन्यतम-मन्त्रं देशम् अस्मारयत् | महात्म-गान्धिनः सः मन्त्रः आसीत्, यत् यदि कश्चन कदाचित् द्वैधीभावम् अनुभवति चेद् यत्तेन किं कर्तव्यम्?, किं वा नैव कर्तव्यं, तदा तेन, भारतस्य निर्धनतमस्य साहाय्य-रहितस्य च जनस्य विषये विचारणीयम् | तेनेदं विचारणीयं यत् सः यत्किमपि कर्तुकामः अस्ति तेन किं तस्य जनस्य भद्रं भविष्यति न वा | गान्धिनः अस्मात् विचारात् अग्रेसृत्य अटल-महोदयः अकथयत् यत्, कारगिल-युद्धम्, अस्मभ्यम् अपरमेकं मन्त्रं प्रादात् - मन्त्रमयमासीत्, यत् कस्मादपि महत्वपूर्ण-निर्णयात् प्राक्, वयमिदं विचारयाम, यत् किमयम् अस्माकीनः पदक्षेपः, तस्य सैनिकस्य सम्मानानुरूपः अस्ति वा, यः दुर्गम-पर्वत-शिखरेषु स्वीय-प्राणान् आर्पयत् | आगच्छन्तु, अटल-वर्यस्य स्वरेषु एव वयं तस्येमां भावनां शृणवाम, अवगच्छाम, तथा च, कालस्य अपेक्षास्ति यत् एनां वयं स्वीकरवाम | - Sound bite of Sh. Atal Ji ### -

“वयं सर्वे स्मरामः यत् महात्म-गान्धी अस्मभ्यं मन्त्रमेकं प्रादात्, यत् यदि कश्चन कदाचित् द्वैधीभावम् अनुभवति चेद् यत्तेन किं कर्तव्यम्?, किं वा नैव कर्तव्यं, तदा तेन, भारतस्य निर्धनतमस्य साहाय्य-रहितस्य च जनस्य विषये विचारणीयम् | तेनेदं विचारणीयं यत् सः यत्किमपि कर्तुकामः अस्ति तेन किं तस्य जनस्य भद्रं भविष्यति न वा? कारगिल-युद्धम्, अस्मभ्यम् अपरमेकं मन्त्रं प्रादात् - मन्त्रमयमासीत्, यत् कस्मादपि महत्वपूर्ण-निर्णयात् प्राक्, वयमिदं विचारयाम, यत् किमयम् अस्माकीनः पदक्षेपः, तस्य सैनिकस्य सम्मानानुरूपः अस्ति वा, यः दुर्गम-पर्वत-शिखरेषु स्वीय-प्राणान् आर्पयत् |”

वयस्याः, युद्ध-परिस्थितौ, वयं यत् किमपि कथयामः, कुर्मश्च, सीम्नि स्थितानां सैनिकानां मनोबलोपरि तेषां कुटुम्बानां मनोबलोपरि च तत् गहनतया प्रभावमापादयति | वृत्तमिदं न कदाचिदपि अस्माभिः विस्मरणीयम्, तथा चैतदर्थमेव अस्मदीयः आचारः, अस्माकीनः व्यवहारः, अस्माकीना वाणी, अस्मदीयानि वक्तव्यानि, अस्माकं मर्यादा, अस्मदीयानि च लक्ष्याणि, सर्वमिदं, निकषे नूनं स्थापनीयं यत्, यत्किमपि वयं कुर्वन्तः स्मः, कथयन्तः स्मः, तेन सैनिकानां मनोबलं वर्धेत, तेषां सम्माननमभिवर्धेत च | 'राष्ट्रं सर्वोपरि'- इति मन्त्रस्य कृते, एकतासूत्रेण बद्धाः देशवासिनः, अस्माकं भटानां मनोबलं सहस्रशो विवर्धयन्ति | अस्माकं परम्परासु प्रोक्तमेव - 'सङ्घे शक्तिः कलौ युगे|'

कदाचित्तु वयं वृत्तमिदं विनैव अवगम्य सामाजिक-सञ्चार-माध्यमेषु तादृशीनि वस्तूनि विवर्धयामः यानि अस्माकं देशस्यातितरां हानिम् आपादयन्ति | कदाचित्तु जिज्ञासावशेन सततम् अग्रेसारयन्ति | जानन्ति यदिदं न समीचीनं, तदपि सततं कुर्वन्ति | अद्यत्वे युद्धं, केवलं सीमासु एव नैव युध्यते, देशाभ्यन्तरेऽपि अनेकत्र रङ्गभूमौ युगपदेव युध्यते, तथा च, प्रत्येकमपि देशवासिना तत्र स्वीया भूमिका निश्चेतव्या भवति | अस्माभिरपि स्वीया भूमिका, देशस्य सीम्नि, दुर्गम-परिस्थितिषु च युद्ध-निरतान् सैनिकान् स्मरद्भिः निश्चेतव्या |

मम प्रियाः देशवासिनः, विगतेभ्यः कतिपयेभ्यः मासेभ्यः सम्पूर्ण-देशेन सम्भूय यया रीत्या कोरोना-संक्रमणं सम्मुखीकृतम्, येन हि, अनेकाः आशङ्काः अलीकाः सिद्धाः | साम्प्रतम्, अस्माकं देशे recovery rate- इति पुनःस्वास्थ्यलाभ-मितिः अन्य-देशानाम् अपेक्षया भद्रतरास्ति, युगपदेव, अस्माकं देशे कोरोना-कारणात् सञ्जायमाना मृत्यु-मितिः अपि जगति देशानाम् अधिसंख्यापेक्षया बहु न्यूनास्ति | निश्चितरूपेण एकस्यापि जनस्य प्रणाशः दुःखदः एव, परञ्च भारतं, नैजानां लक्षशो देशवासिनां जीवनानि संरक्षितुं सफलमवर्तत | परन्तु सखायः, कोरोना-सङ्कटं नैव व्यपगतम् | अनेकेषु स्थानेषु एतत् रंहसा प्रसरति | अस्माभिः अतितरां सावधानैः भाव्यम् | अस्माभिः सम्यक्तया ध्यातव्यमस्ति यत् कोरोना-संक्रमणं साम्प्रतमपि तावदेव घातकमस्ति, यावत्, आरम्भे आसीत्, अत एव, वयं पूर्णरूपेण सावहिताः भवेम | मुखोपरि मुखाच्छादकस्य सन्धारणम् आहोस्वित् अङ्गवस्त्रस्य उपयोगः, दो गज़ की दूरी-ति दूरत्व-धारणम्, सततं हस्त-प्रक्षालनम्, कुत्रचिदपि निष्ठीवनं नैव करणीयम्, स्वच्छतायाः सन्धारणं पूर्णतया पालनीयम् - एतानि एव अस्मदीयानि आयुधानि यानि कोरोना-संक्रमणात् सुरक्षितुम् अर्हन्ति | कदाचित् वयं मुखाच्छादकात् कष्टम् अनुभवामः, तथा चाभिलषामः यत् मुखात्

मुखाच्छादकमपनयाम । सम्वादमारभामहे, यदा मुखाच्छादकस्य आवश्यकता समधिका भवति, तस्मिन् काले एव मुखाच्छादकम् अपनयामः । एतस्यां स्थितौ, अहं, भवतः साग्रहं कथयिष्यामि यत् मुखाच्छादकस्य कारणात् यदापि भवन्तः कष्टमनुभवन्ति, इच्छन्ति यत् मुखाच्छादकमपनयाम, तदा, क्षणमात्रं तान् चिकित्सकान् स्मरन्तु, ताः परिचारिकाः स्मरन्तु, अस्माकं तान् कोरोना-योद्धृन् च स्मरन्तु, भवन्तः अवलोकयन्तु, यत्ते मुखाच्छादकं सन्धार्य अनेक-होरा-पर्यन्तं सततं, अस्मदीयं जीवनं संरक्षितुं तत्पराः भवन्ति । अष्टौ दश वा होरा-पर्यन्तं मुखाच्छादकानि परिधारयन्ति । किं ते कष्टं नानुभवन्ति! किञ्चित् तान् स्मरन्तु, भवन्तोऽपि अनुभविष्यन्ति यत् अस्माभिः नागरिकत्वेन नात्र किञ्चिदपि न्यूनं व्यवहर्तव्यं, न चैतदर्थम् अन्यः कश्चन अनुज्ञातव्योऽस्ति । एकतोऽस्माभिः कोरोना-संक्रमणं विरुध्य पूर्णावधानतया जागर्ति-पुरस्सरञ्च योद्धव्यमस्ति, अपरतश्च, कठोर-परिश्रमेण, व्यवसायं, सेवाम्, अध्ययनम्, यत्किमपि, कर्त्तव्यं वयं निभालयामः, तस्मिन् गतिः आपादनीयास्ति, तदपि नूतनोच्छ्रितताां प्रति सन्नेयमस्ति ।

सखायः, कोरोना-काले तु अस्माकं ग्रामीण-क्षेत्राणि अशेष-देशं दिशा-प्रदर्शनं कृतवन्ति । ग्रामेभ्यः स्थानीय-नागरिकाणां, ग्राम-पञ्चायतानां च बहुविधाः समीचीनाः प्रयासाः अनारतं सम्मुखम् आयान्ति । जम्मू-क्षेत्रे ग्राम-त्रेवा-इति ग्राम-पञ्चायतं वर्तते । तत्र सरपञ्चत्वेन बलबीरकौर-महोदया विराजते । सूचितोऽहं यत् बलबीरकौर-वर्या स्वीये पञ्चायते त्रिंशत्-शायिका-युतं Quarantine Centre -इति सङ्गरोधि-केन्द्रं निर्मितवती । पञ्चायतं प्रति नीयमानेषु मार्गेषु, पेय-जलापूर्तिं व्यवस्थापितवती । जनाः हस्त-प्रक्षालनार्थं किञ्चिदपि कष्टं नानुभवेयुः - इति निधाय व्यवस्थापितम् । नैतावदेव केवलं, एषा बलबीरकौर-महोदया, स्वयं, निज-स्कन्धयोः उपरि spray pump-इति प्रसारि-उदञ्चं धृत्वा, स्वयंसेविभिः सम्भूय, कृत्स्नेऽपि पञ्चायते, पार्श्ववर्तिषु च क्षेत्रेषु, sanitization - इति निष्कीटाणु-कार्याणि अपि करोति । एतादृशी एवापरा एका कश्मीर-वास्तव्या महिला सरपञ्च-महाभागास्ति । गान्दरबले चौंटलीवारस्य जैतूना-बेगम-वर्या । जैतूना-बेगम-महोदया निर्णयं कृतवती यत् तस्याः पञ्चायतं कोरोना-संक्रमणं विरुद्ध्य योत्स्यति, धनार्जनार्थमपि अवसरान् प्रापयिष्यति । सा पूर्णेऽपि क्षेत्रे निशुल्कं मुखाच्छादकानि व्यतरत्, निःशुल्कं खाद्य-वस्तूनि वितरितवती, युगपदेव सा जनेभ्यः शस्यार्थं बीजानि सेव-पादपान् चापि प्रादात्, येन जनाः कृष्यर्थं उद्यान-कर्षणार्थञ्च कष्टानि नैवानुभवेयुः, ।

सखायः, कश्मीर-राज्यात् अपरापि प्रेरक-घटनास्ति, अत्र अनन्तनागे नगर-पालिकाध्यक्षः श्रीमोहम्मद-इकबालः अस्ति, यः स्वीये क्षेत्रे निष्कीटाणु-कार्यार्थं प्रसारि-उदञ्चान् अपेक्षते स्म | तेन सम्बद्धा सूचना एकत्रीकृता, ज्ञातञ्च यत् यन्त्रम्, अन्य-नगरात् आनेतव्यं भविष्यति, तस्य मूल्यमपि भविष्यति षट्-लक्ष-रूप्यकाणि, तदा श्री-इकबालः स्वयमेव प्रयत्य प्रसारि-उदञ्च-यन्त्रं विनिर्मितवान्, तच्च केवलं पञ्चाशत्-सहस्र-रूप्यकाणां व्ययेन - एतादृशीनि अनेकानि उदाहरणानि | अशेषदेशे, कोणे-कोणे, एतादृश्यः अनेकाः प्रेरक-घटनाः प्रतिदिनं सम्मुखमायान्ति, एते सर्वेऽपि अभिनन्दनीयाः | समाह्वानम् आगतम्, परञ्च जनाः, तावत्या एव शक्त्या, तत् प्रतीकृतवन्तः अपि |

मम प्रियाः देशवासिनः, समीचीन-पद्धत्या सकारात्मकेन च मार्गेण सर्वदैव आपदाम् अवसरत्वेन, विपत्तिञ्च विकासत्वेन परिवर्तयितुं महत्-साहाय्यं लभ्यते | प्रत्यग्रं वयं, कोरोना-काले अवलोकयामः यत् केन प्रकारेण अस्मदीय-देशस्य युव-महिलाः, निज-प्रतिभया स्वीय-कौशलेन च नवीनान् प्रयोगान् आरभन्त |

बिहार-राज्ये अनेके महिला-स्वयंसहायि-समूहाः मधुबनी-चित्रकलायुतानि मुखाच्छादकानि निर्मातुम् आरभन्त, तथा च, पश्यता एव, एतानि अतिलोकप्रियाणि जातानि | एतानि मधुबनी-चित्रकलायुतानि मुखाच्छादकानि एकतः निज-परम्पराणां प्रचारं तु कुर्वन्त्येव, जनेभ्यः, स्वास्थ्येन साकमेव, वृत्तितामपि प्रापयन्ति | भवन्तः जानन्त्येव - उत्तर-पूर्वीये क्षेत्रे वेत्रः कियत्यां बृहन्मात्रायाम् उत्पद्यते, साम्प्रतं, अमुना एव वेत्रेण त्रिपुरा-मणिपुर-असम-राज्यानां शिल्पिनः उच्च-स्तरीयानां जलकूपीनां Tiffin- Box-इति खाद्य-मञ्जूषाणां च निर्माणम् आरभन्त | वेत्रेभ्यः, यदि भवन्तः, एतेषां गुणवत्ताम् अवलोकयिष्यन्ति, तर्हि विश्वासं कर्तुं नैव शक्ष्यन्ति यत् वेत्र-कूप्यः अपि एतावत्यः विलक्षणाः भवितुमर्हन्ति, तथा चैताः कूप्यः eco-friendly- इति पर्यावर्णानुकूलाः अपि सन्ति | यदा आसां निर्माणं विधीयते, तदा वेत्राः पूर्वं, निम्ब-पत्रैः अन्यौषधीय-पादपैः च साकं क्वाथयित्वा सज्जीक्रियन्ते, येन एतेषु औषधीय-गुणानाम् आधानमपि भवति | लघु-लघुभिः स्थानीयोत्पादैः कियती महती सफलता अधिगम्यते- इत्यस्याः अन्यतमम् उदाहरणं झारखण्डेऽपि प्राप्यते | झारखण्डे बिशुनपुरे साम्प्रतं त्रिंशदधिकाः समूहाः मिलित्वा lemon grass -इति निम्बूक-तृणानां कृषिं कुर्वन्ति | निम्बूक-तृणानि मास-चतुष्टये सज्जीभवन्ति, तथा च, अस्य तैलं विपणीषु सम्यक्-मूल्यैः विक्रीयते | अद्यत्वे अस्य बहु संयाचनमपि वर्तते | अहम्, देशस्य प्रान्त-द्वयस्य विषयेऽपि चर्चितुं

वाञ्छामि, एतद्-द्वयमपि, मिथः सहस्राधिक-किलोमीटर-मितान्तरालेन दूरे वर्तते, तथा च स्व-स्व-प्रकारेण भारतम् आत्मनिर्भरं विधातुं किञ्चित् विशिष्टमेव कार्यं करोति - एकमस्ति लद्दाख-क्षेत्रम्, अपरमस्ति कच्छ-क्षेत्रम् | लेह-लद्दाखयोः नाम-श्रवणेन एव मनोरमानाम् उपत्यकानाम् उच्छ्रिततराणां पर्वतानां च दृश्यानि अस्माकं सम्मुखम् उपतिष्ठन्ते, सद्यस्तन-वायोः लहर्यः अनुभूयन्ते | तत्रैव कच्छस्य उल्लेखेन साकमेव रण-प्रदेशः, दूरं सुदूरं च यावत् रण-प्रदेशः उपतिष्ठते, कुत्रचिदपि वृक्ष-पादपाः दृष्टि-गोचराः नैव जायन्ते, एतत्-सर्वं वयमनुभवामः | लद्दाखे एकं विशिष्ट-फलं भवति यस्य नामास्ति -'चूली' अर्थात् apricot-खुबानीति भाषायाम् | एतत्-शस्यम् अस्य क्षेत्रस्य अर्थ-व्यवस्थां परिवर्तयितुं क्षमते, परन्तु, दुःखदोऽयं विषयः, आपूर्ति-शृङ्खला, ऋतोः प्रतिकूलता-सदृन्शि अनेकानि समाह्वानानि अमुना सम्मुखीक्रियन्ते | अस्य न्यूनतरा हानिः स्यात्- इत्येतदर्थम्, अद्यत्वे, अन्यतमस्य नवाचारस्य प्रयोगः आरब्धः - एका द्विधा पद्धतिः अस्ति, यस्याः नामास्ति- solar apricot dryer and space heater- अर्थात् सौर-खुबानी-शुष्कीकरणावकाशोष्णीकरणी | अनया पद्धत्या खुबानी-फलानि अन्यानि फलानि शाकादिकञ्च यथावश्यकं शुष्कीकर्तुं प्रभवन्ति, तच्चापि स्वास्थ्य-प्रदायि-प्रकारेण | पूर्वं यदा खुबानी-फलानि क्षेत्राणि पार्श्वे शुष्कीक्रियन्ते स्म, तदा महती क्षतिः भवत्येव स्म, युगपदेव, धूलि-वृष्टिजलयोः कारणात् फलानां गुणवत्तापि दुष्प्रभवति स्म | अपरतः, अद्यत्वे, कच्छ-प्रदेशे कृषकाः Dragon-फलानां कृष्यर्थं स्तुत्यान् प्रयासान् विदधति | जनानाम् अधिसंख्यं यदा शृणोति, तदा आश्चर्यमनुभवति - कच्छ-प्रदेशः, अपि च Dragon-फलानि? परञ्च, तत्र, अद्यत्वे अनेके कृषकाः कार्येऽस्मिन् संलग्नाः सन्ति | फलानां गुणवत्तां न्यूनतर-भूमौ चाधिकतरं उत्पादनमाधृत्य अत्र बहुविधाः नवाचार-प्रयोगाः विधीयन्ते | अहं ज्ञापितः यत् Dragon-फलानां लोकप्रियता अनारतं वर्धते, विशेषेण, प्रातराशे अस्य प्रयोगः अतितरां विवर्धते | कच्छस्य कृषकाणां सङ्कल्पोऽस्ति यत् देशः Dragon-फलानाम् आयात-हेतोः वैवश्यं नानुभवेत् - एतदेवास्ति आत्मनिर्भरतायाः वृत्तम् |

सखायः, यदा वयं किमपि नवीनं कर्तुं विचारयामः, नवाचारान् परिशीलयामः च, तदा, एतादृशीनि कार्याणि अपि सम्भाव्यन्ते, यानि सामान्यतया, न कश्चिदपि कल्पयितुं शक्नोति, यथा हि, बिहारस्य काञ्चन युव-जनान् परिभावयन्तु | पूर्वमेते सामान्य-सेवासु आसन् | एकस्मिन् दिने, एते निश्चितवन्तः यत् ते मुक्ताकृषिम् अर्थात् pearls-कृषिं करिष्यन्तीति | तेषां क्षेत्रे, जनाः विषयेऽस्मिन् नाधिकं किमपि जानन्ति स्म, परञ्च, एते पूर्वं, सर्वविधं सूचनाजातम् एकत्रीकृतवन्तः, जयपुर-भुवनेश्वरे गत्वा प्रशिक्षणं लब्धवन्तः, तथा च, स्वीये ग्रामे

एव मुक्ता-कृषिम् आरभन्त| साम्प्रतम्, एते स्वयन्तु पर्याप्तम् अर्जयन्ति, सहैव, एते मुज़फ्फरपुर-बेगूसराय-पटना-नगरेषु अन्यराज्येभ्यः परावर्तितान् प्रवासि-श्रमिकान् प्रशिक्षयितुमपि आरभन्त | अनेकेषां जनानां कृते अनया पद्धत्या आत्मनिर्भरतायाः मार्गाः अनावृताः जाताः ।

सखायः, इतः परं कतिपयेष्वेव दिनेषु रक्षाबन्धनस्य पावनपर्व समुपैति |अहं, एतेषु दिनेषु पश्यामि यत् अनेके जनाः संस्थाश्च क्रमेऽस्मिन् रक्षाबन्धन-पर्व किञ्चित् पृथक्-रीत्या आमन्तुम् अभियानानि प्रवर्तयन्ति | केचन जनाः एतत् Vocal for local-इति समाघोषेण संयोजयन्ति, तथा च, वृत्तमिदमपि सत्यमेवास्ति | अस्माकं पर्वावसरे, अस्मदीय-समाजस्य, अस्माकं गृहं समीपे एव कस्यचन जनस्य व्यापारः सम्वर्धेत, तस्यापि पर्व प्रसन्नता-प्रदं स्यात्, तदा, पर्वणः आनन्दः, किञ्चित् पृथगेव भवति ।सर्वेषामपि देशवासिनां कृते रक्षाबन्धनस्य भूयस्यः शुभकामनाः ।

सखायः, ऑगस्ट-मासे सप्तमे दिने राष्ट्रिय-हस्तवेम-दिवसोऽस्ति |भारतस्य हस्तवेम, अस्मदीयं हस्तशिल्पम्, स्वस्मिन् सहस्राधिक-वर्षाणां गौरवमयेतिहास-समन्वितम् अस्ति |अस्माकं सर्वेषां प्रयासः स्यात् यत् न केवलं भारतीय-हस्तवेम्नः हस्तशिल्पस्य च समधिकम् उपयोगं करवाम, अथ च, विषयेऽस्मिन्, अस्माभिः अधिकाधिक-जनाश्चापि सूचनीयाः । भारतस्य हस्तवेम-हस्तशिल्पौ कियन्तौ समृद्धौ, अनयोः कियती विविधतास्ति, जगत् विषयेऽस्मिन् यावद् अधिकतरं ज्ञास्यति, तावन्तः एव, अस्मदीयाः स्थानीयाः शिल्पिनः तन्तुवायाश्च लाभान्विताः भवितारः ।

वयस्याः, विशेषेण मम युव-सखायः, अस्माकं देशः परिवर्तते |केन प्रकारेण परिवर्तते? कियत्या गत्या परिवर्तते? केषु केषु क्षेत्रेषु परिवर्तते? सकारात्मक-विचारेण साकं यदि वयं पश्यामः, तर्हि वयं स्वयमपि आश्चर्यमनुभविष्यामः |एकः कालः आसीत्, यदा क्रीडातः आरभ्य इतर-क्षेत्रेषु जनानाम् अधिसंख्यं महानगरेभ्यः भवति स्म, आहोस्वित् बृहद्भ्यः कुटुम्बेभ्यः आहोस्वित् सुख्यातेभ्यः विद्यालयेभ्यो वा महाविद्यालयेभ्यः भवति स्म |अधुना, देशः परिवर्तते |ग्रामेभ्यः, लघुनगरेभ्यः, सामान्य-कुटुम्बेभ्यः च अस्मदीयाः युवानः अग्रे आयान्ति |सफलतायाः नूतनानि शिखराणि चुम्बन्ति | एते जनाः मध्येसङ्कटमपि नव-नवीनान् स्वप्नान् सन्धारयन्तः अग्रेसरन्ति | किञ्चित् एतादृशमेव वयं नातिचिरं मण्डलीय-परीक्षाणां परिणामेषु दृष्टवन्तः | अद्य ‘मनोगते’ वयं कैश्चित् एतादृग्भिः प्रतिभाशालि-पुत्री-

पुत्रैः सम्भाषणं कुर्मः | एतादृशी एव एका प्रतिभाशालिनी पुत्री अस्ति - कृतिका-नांदलः | कृतिका हरियाणा-राज्यस्य पानीपत-वास्तव्यास्ति |

मोदीजी – हरिः ॐ, कृतिके नमस्ते |

कृतिका – नमस्ते, महोदय!

मोदीजी – एतादृशाय भद्रतराय परिणामाय भूरि अभिनन्दनम् |

कृतिका – धन्यवादः महोदय!

मोदीजी – तथा चैतेषु दिनेषु दूरभाष-प्रत्युत्तरे भवती क्लान्ता भवेत् | बहवो जनाः दूरभाषाकारणाः कुर्वन्तः स्युः |

कृतिका – एवं महोदय!

मोदीजी – तथा च, ये जनाः वर्धापनं प्रयच्छन्ति, तेऽपि गौरवम् अनुभवन्तः भवेयुः, यत्ते भवतीं जानन्तीति | कीदृशम् अनुभवति भवती |

कृतिका – महोदय! बहुतरं रोचते मह्यम् | पितरौ गौरवान्वितौ जातौ इति कृत्वा आत्मानमपि बहु गौरवान्विताम् अनुभवामि |

मोदीजी - साधु, कथयतु यत् भवत्याः श्रेष्ठा प्रेरणा कः वा कास्ति?

कृतिका – महोदय! मदीया जननी अस्ति मम बृहत्तमा प्रेरणा |

मोदीजी – बाढम् | सम्यक्, भवती जनन्या किं शिक्षयति |

कृतिका – महोदय, सा निज-जीवने एतावन्ति कष्टानि अनुभूतवती, तथापि सा एतावती दृढा स्थिरा चास्ति, महोदय! तां दर्शं दर्शं तावतीं प्रेरणाम् अवाप्नोमि यदहमपि तादृशी एव भवेयम् |

मोदीजी - माता कियती शिक्षितास्ति?

कृतिका – महोदय! सा स्नातक-परीक्षां उत्तरितवती |

मोदीजी – स्नातक-परीक्षां उत्तरितवती?

कृतिका – आम्, महोदय!

मोदीजी – भद्रम् | अपि माता भवतीं शिक्षयति?

कृतिका – एवं महोदय! शिक्षयति, व्यवहार-जगतः प्रत्येकमपि वृत्तं कथयति |

मोदीजी – सा किं भर्त्सयति अपि!

कृतिका – एवम्, महोदय! भर्त्सयति अपि |

मोदीजी – समीचीनम्, पुत्रि! भवती अग्रे किं कर्तुं वाच्छति?

कृतिका – महोदय! अहं चिकित्सिकां भवितुं वाञ्छामि |

मोदीजी – अयि भोः, बाढम्!

कृतिका – MBBS

मोदीजी – पश्यतु, चिकित्सकीभवनं सरलं नास्ति!

कृतिका – एवं महोदय!

मोदीजी – पदवीं तु प्राप्स्यति यतो हि भवती अस्ति तेजस्विनी, पुत्रि! परञ्च चिकित्सकस्य जीवनं समाजस्य कृते समर्पितं भवति |

कृतिका – एवं महोदय!

मोदीजी – सः सा च न कदाचिदपि रात्रौ सुखेन स्वप्तुं शक्नोति | कदाचित् रोगिणः दूरभाषमागच्छति, चिकित्सालयात् दूरभाषमागच्छति, तदा धावित्वा गन्तव्यं भवति | अर्थात् एकप्रकारेण आवर्षम् अहर्निशं च चिकित्सकस्य जीवनं जनानां सेवायामेव व्यतीतं भवति |

कृतिका – एवं महोदय!

मोदीजी - तथा च, सङ्कटमपि भवति, यतो हि, न ज्ञायते, अद्यतनाः ये रोगाः सन्ति, एतस्मात् चिकित्सकानां सम्मुखमपि महत्तरं सङ्कटं भवति |

कृतिका – एवं महोदय!

मोदीजी – साधु, कृतिके, हरियाणा-राज्यन्तु क्रीडा-क्षेत्रे पूर्णस्यापि हिन्दुस्थानस्य कृते सर्वदैव प्रेरणा-प्रदं, प्रोत्साहन-वर्धकं च राज्यमस्ति ।

कृतिका – एवम्, महोदय!

मोदीजी – तर्हि किं भवती अपि कस्याञ्चन क्रीडायां सहभागित्वमावहति, काचित् क्रीडा रोचते भवत्यै?

कृतिका – महोदय! बास्केटबाल-क्रीडां क्रीडामि स्म विद्यालये|

मोदीजी – शोभनम्, भवत्याः उच्छ्रितता कियती अस्ति, अधिकास्ति किम्?

कृतिका – नैव, महोद्य! पञ्च-फुटाधिकेञ्च-द्वय-मितास्ति ।

मोदीजी – बाढम्, तर्हि किं भवत्याः क्रीडा अन्येभ्यः अपि रोचते किमु?

कृतिका – महोदय! केवलं उत्कटा समीहास्ति, क्रीडामि एव ।

मोदीजी – सम्यक्, सम्यक् । अस्तु कृतिके, भवत्याः जनन्यै मम प्रणामः निवेदनीयः, सा भवतीम् एतादृशीं योग्यां व्यदधात् । भवत्याः जीवनं विरचितवती । भवत्याः जनन्यै प्रणामः भवत्यै च भूयान्सि अभिनन्दनानि, भूयस्यः शुभकामनाः ।

कृतिका – धन्यवादः महोदय!

आगच्छन्तु! साम्प्रतं वयं चलामः केरलस्य एर्णाकुलम् । तत्रत्येन युवकेन साकं सम्भाषणं कुर्मः ।

मोदीजी - हरिःॐ ।

विनायकः - हरिः ओम्, महोदय, नमस्कारः।

मोदीजी - अस्तु विनायक! वर्धापनम्।

विनायकः - आम्, धन्यवादः महोदय!

मोदीजी - सुकृतं विनायक! सुकृतम् ।

विनायकः - धन्यवादः महोदय!

मोदीजी - हाउ इज् द जोश।

विनायकः - हाई सर!

मोदीजी - अपि भवान् कामपि क्रीडां क्रीडति?

विनायकः - बेडमिंटन-क्रीडाम् ।

मोदीजी - बेडमिंटन-क्रीडाम्?

विनायकः - आम्, श्रीमन्!

मोदीजी - विद्यालये अथवा अन्यत्र प्रशिक्षणं अधिगच्छति?

विनायकः - नहि, मया विद्यालये किंचित्प्रशिक्षणं अवाप्तम्...

मोदीजी - शोभनम्।

विनायकः - अस्माकं शिक्षकैः।

मोदीजी - एवम् ।

विनायकः - येन अहं अन्यत्र क्रीडनाय अवसरं लभेयम् ।

मोदीजी - शोभनम् ।

विनायकः - विद्यालयेनैव..

मोदीजी - भवता कति राज्यानि उपसेवितानि?

विनायकः - मया केवलं केरलं तमिलनाडुं च दृष्टे स्तः।

मोदीजी - केवलं केरलं तमिलनाडुं च ।

विनायकः - आम् महोदय!

मोदीजी - अपि भवान् दिल्लीं द्रष्टुमिच्छति?

विनायकः - आम् महोदय! मया स्वीय-उच्चशिक्षायै दिल्लीविश्वविद्यालये आवेदनं कृतमस्ति।

मोदीजी - कथयतु। अपि भवान् अनागते मण्डलीय-परीक्षाकाले सहभागि-विद्यार्थिनां कृते कमपि सन्देशं प्रदातुं इच्छति?

विनायकः - कठोरश्रमः सम्यक् समयोपयोगः च करणीयौ ।

मोदीजी - सम्यक्-समयप्रबन्धनम् ।

विनायकः - आम्, महोदय!

मोदीजी - विनायक! अहं भवतः रुचिविषये ज्ञातुमिच्छामि।

विनायकः - बेडमिण्टन-क्रीडां, नौकाचालनं च करोमि।

मोदीजी - अपि भवान् सामाजिक-सञ्चार-माध्यमेषु सक्रियः अस्ति?

विनायकः - नहि। विद्यालये वैद्युदाण्विक-उपकरणानां प्रयोगस्य अनुमतिः नास्ति।

मोदीजी - एवम् | भवान् सौभाग्यशाली अस्ति।

विनायकः - आम्, श्रीमन्!

मोदीजी - अस्तु विनायक! पुनः अभिनन्दनं, सौभाग्यमस्तु।

विनायकः - धन्यवादाः महोदय!

आगच्छन्तु, वयम् उत्तरप्रदेशं चलामः। तत्र अमरोहावासिना श्रीमता उस्मान्-सैफिना साकं सम्भाषणं कुर्मः।

मोदीजी - हरिःॐ, उस्मान्! बहु वर्धापनम् । भवते सुबहु-शुभकामनाः।

उस्मान् - धन्यवादाः, महोदय!

मोदीजी - अस्तु! उस्मान्, कथयतु, यथापि भवता काङ्क्षितः तथैव परिणामः आगतः अल्पतरो वा?

उस्मान् - नहि। यथैव अनुमानितः तथैव अधिगतः। मम पितरावपि प्रसन्नौ स्तः।

मोदीजी - शोभनम्, शोभनम् । परिवारे अन्येऽपि भ्रातारः भवादृशाः एव तेजस्विनः अथवा भवान् एव विशेषतः मेधावी अस्ति?

उस्मान् - अहमेवास्मि। मम भ्राता किंचित् चंचलः अस्ति।

मोदीजी - अस्तु, अस्तु।

उस्मान् - मम विषये अतिप्रसन्नः भवति।

मोदीजी - शोभनम्। यदा भवान्पठति स्म, तदा उस्मान्! भवतः प्रियः विषयः कः आसीत्?

उस्मान् - गणितम्।

मोदीजी - बहुशोभनम्। गणिते का रुचिः आसीत्? कथमेतदभवत्? केन शिक्षकेण भवान् प्रेरितः?

उस्मान् - अस्माकम् एकः विषय-शिक्षकः 'रजत-महोदयः अस्ति। सः माम् उत्प्रेरितवान्। असौ सम्यक्तया पाठयति। मम गणितम् आरम्भतः एव उत्कृष्टम् अवर्तत। एतच्च रुचिकरम् अप्यस्ति।

मोदीजी - अस्तु।

उस्मान् - यावान् अहं करोमि तावान् आनन्दः भवति। एतेनैव एषः मम प्रियविषयः।

मोदीजी - शोभनम्। अपि भवान् जानाति यदेका अन्तर्जालीया वैदिकगणितकक्षा चलति।

उस्मान् - आम्, श्रीमन्!

मोदीजी - अपि कदापि एतस्याः कृते प्रयतितम्?

उस्मान् - नहि महोदय! आसाम्प्रतं नैव कृतम्।

मोदीजी - भवान् पश्यतु । भवतः मित्राणि भवन्तं मायाविनमिव द्रक्ष्यन्ति। यतो हि भवता संगणकमिव गणनां कर्तुं शक्यते । वैदिकगणिते सरलाः विधयः सन्ति; तच्च साम्प्रतं अन्तर्जाल- माध्यमेन उपलब्धम् अस्ति।

उस्मान् - एवम्, महोदय!

मोदीजी - यतो हि भवतः रुचिः गणितेऽस्ति, तर्हि अनेकविधानि नव-नवीनानि वस्तूनि अपि दातुं भवान् शक्नोति |

उस्मान् - आम्, महोदय!

मोदीजी - उस्मान्! भवान् अवकाशसमये किं करोति?

उस्मान् - अवकाशसमये अहं किमपि लिखामि। मह्यं लेखनं रोचते।

मोदीजी - बहुशोभनम् । अस्य तात्पर्यं यद् गणितेन साकं भवान् साहित्येऽपि रुचिम् आदधाति ।

उस्मान् - आम्, श्रीमन्!

मोदीजी - किं लिखति? काव्यं कवितां वा?

उस्मान् - यत्किमपि। सामयिक-विषयेषु सम्बद्धं कमपि विषयमाधृत्य लिखामि।

मोदीजी - अस्तु।

उस्मान् - एतेन नूतनाः सूचनाः प्राप्यन्ते। यथा जी.एस.टी.-नोटबन्दी-इत्यादयः।

मोदीजी - शोभनम् । तर्हि भवान् महाविद्यालयीय-शिक्षायै किं योजयति?

उस्मान् - महाविद्यालीयशिक्षा-विषये, मम जे.ई.ई.- इत्यस्य प्रथम प्रयासः सफलः जातः। साम्प्रतमहं सेप्टेम्बर-मासे द्वितीयं प्रयासं करिष्यामि। मम लक्ष्यम् आई.आई.टी.-संस्थानेन स्नातकोपाधेरधिगमनं ततश्च प्राशासनिक-सेवामाध्यमेन आई.ए.एस.- इति भारतीय-प्राशासनिक-सेवायोजनमस्ति।

मोदीजी - बहुशोभनम्। भवान् प्रविधावपि समुत्सुकः?

उस्मान् - आम्, श्रीमन्! एतेनैव मया सूचनाप्रविधिः चयनीकृतः अस्ति।

मोदीजी - अस्तु, उस्मान्! मम पक्षतः बहु शुभकामनाः। भवतः भ्राता चंचलः अस्ति येन

द्वाभ्यामपि कालः शोभनतया यापितः स्यात्। स्वीय-पितृभ्यां मम पक्षतः प्रणामं व्याहरतु । ताभ्यां भवते अवसरः प्रदत्तः उत्साहश्च वर्धितः। भवान् अध्ययनेन साकं सामयिक-विषयेष्वपि पठनं लेखनं च करोति- इति ज्ञात्वाऽहं प्रसन्नोऽस्मि । एतेन विचारेषु तीक्ष्णत्वं आगच्छति बहवश्च लाभाः भवन्ति। मम पक्षतः पुनश्च बहु वर्धापनमस्तु।

उस्मान् - धन्यवादाः, महोदय!

आगच्छन्तु । साम्प्रतं दक्षिणां दिशां गच्छामः। तमिलनाडोः नामाक्कलवासिन्या पुत्र्या कनिग्गया साकं सम्भाषणं । कनिग्गायाः कथा तु अतीव प्रेरणाप्रदास्ति।

मोदीजी - कनिग्गा-महोदये! वणक्कम् ।

कनिग्गा - वणक्कम्, श्रीमन्!

मोदीजी - कीदृशी असि त्वम्?

कनिग्गा - शोभनम्, श्रीमन्!

मोदीजी - प्रथमतः अहं भवत्याः उत्कृष्ट-सफलतायै वर्धापनं व्याहरामि।

कनिग्गा - धन्यवादाः, महोदय!

मोदीजी - यदाहं नामाक्कल-विषये शृणोमि तदा अंजनैय्यर-मंदिर-विषये चिन्तयामि।

कनिग्गा - एवम्, श्रीमन्!

मोदीजी - इतः परमहं भवत्या साकं सञ्जात-सम्भाषणमपि स्मरिष्यामि।

कनिग्गा - अस्तु, श्रीमन्!

मोदीजी - पुनः शुभकामनाः।

कनिग्गा - धन्यवादाः, महोदय!

मोदीजी - भवत्या आरम्भतः एव महत्प्रयासः कृतः भवेत्। परीक्षायाः कृते

अभ्यासविषये भवत्या कीदृशः अनुभवः अवाप्तः?

कनिग्गा - श्रीमन्! मया आरम्भतः एव कठिनश्रमः कृतः, परीक्षास्वपि सटीकलेखनं सम्पादितम् इतिकृत्वा मया शोभनपरिणामः अधिगतः।

मोदीजी - भवत्याः अपेक्षा कीदृशी आसीत्?

कनिग्गा - पञ्चाशीत्युत्तर-चतुःशत-मिताः अथवा षडशीत्युत्तर-चतुःशतमिताः अङ्काः।

मोदीजी - कति अङ्काश्च साम्प्रतं अधिगताः?

कनिग्गा - नवत्युत्तर-चतुःशतमिताः ।

मोदीजी - भवत्याः कुटुम्ब-जनानां शिक्षकाणां च कीदृशी प्रतिक्रियास्ति?

कनिग्गा - ते हि अतीव प्रसन्नाः गर्विताश्च सन्ति।

मोदीजी - भवत्याः प्रियः विषयः कोस्ति?

कनिग्गा - गणितम्।

मोदीजी - ओह! भवत्याः भाविन्यः योजनाः काः सन्ति?

कनिग्गा - अहं चिकित्सिकां भवितुमिच्छामि, सम्भवतः ए.एफ.एम.सी.-संस्थाने।

मोदीजी - भवत्याः परिवारजनाः अपि चिकित्साव्यवसाये सन्ति अन्यत्र वा?

कनिग्गा - नहि, श्रीमन्! मम जनकः वाहनचालकः अस्ति। मम भगिणी च एम.बी.बी.एस.- इति करोति।

मोदीजी - बहु शोभनम्। प्रथमतस्त्वहं भवत्याः पितरं नमामि यो हि भगिन्याः भवत्याश्च कृते बहुप्रयासं करोति। तस्यैषा सेवा हि महनीयास्ति।

कनिग्गा - एवम्, श्रीमन्!

मोदीजी - असौ हि सर्वेषां कृते प्रेरणाप्रदः अस्ति।

कनिग्गा - आम्, श्रीमन्!

मोदीजी - भवत्याः भगिन्याः पितुः परिवारस्य च कृते मम पक्षतः भूयस्यः शुभकामनाः।

कनिग्गा - धन्यवादाः, श्रीमन्!

सखायः! एवमेव बहवो युवजनाः सन्ति, कठिनासु परिस्थितिषु येषां मनोबलस्य, साफल्यस्य च कथाः अस्मान् प्रेरयन्ति। मम इच्छासीत् यदधिकाधिकैः युवजनैः साकं सम्भाषणावसरः अधिगन्तव्यः, परं समयस्य मर्यादा भवति। अहं सर्वेभ्यः युवजनेभ्यः आग्रहं करोमि यत्ते स्वीयाः उत्प्रेरकाः सङ्घर्षगाथाः सर्वेभ्यः संसूचयेयुः येन देशवासिनः प्रेरिताः भवेयुः।

मम प्रियाः देशवासिनः! सप्तसमुद्र-पारं भारतात् सहस्राधिककिलोमीटरदूरं एकं लघुराष्ट्रमस्ति यस्य नाम 'सूरिनाम' इत्यस्ति। सूरिनामेन साकं भारतस्य अतीव निकटसम्बन्धाः वर्तन्ते। शताधिकवर्षपूर्वं भारतीयैः तद्देशः अन्यगृहमिव स्वीकृतः । अद्य तेषां चतुर्थी पञ्चमी वा वंशश्रेणी तत्र निवसति। सूरिनाम-देशे साम्प्रतं चतुर्थांशमिताः नागरिकाः भारतमूलीयाः सन्ति। अपि भवन्तः जानन्ति यत्तत्रत्या 'सरनामी' - नामिका प्रमुखभाषा 'भोजपुरी' -इत्यस्य उपभाषास्ति। इतादृक्- सांस्कृतिक-सम्बन्धेषु वयं भारतीयाः गर्वमनुभवामः।

विगतदिनेषु श्री चन्द्रिकाप्रसाद-संतोखी सूरिनामस्य नूतनः राष्ट्रपतिः निर्वाचितः। असौ भारतस्य मित्रमस्ति। तेन हि अष्टादशोत्तर-द्विसहस्रतमे वर्षे आयोजिते भारतमूलीयानां जनानां संसदीय-सम्मेलने सहभागित्वं कृतमासीत्। श्रीचन्द्रिकाप्रसाद-संतोखी-महोदयेन स्वीय-शपथग्रहणस्य आरम्भः वेदमन्त्रैः कृतः। असौ संस्कृतभाषया सम्भाषितवान् । वेदानाम् उल्लेखसहितं तेन "ॐ शान्तिः शान्तिः शान्तिः' इत्यनेन स्वीय-शपथः सम्पादितः । स्वीयहस्तयोः वेदं गृहीत्वा असौ उच्चारितवान् - 'अहं चन्द्रिकाप्रसाद-संतोखी...' पुनश्च तेन वेदमन्त्रस्य उच्चारणं कृतम्। तेन कथितम् - 'ॐ अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्। इदमहमनृतात् सत्य- मुपैमि।' अस्य अर्थः अस्ति यत् हे अग्ने! संकल्पस्य देव! अहं एकां प्रतिज्ञां करोमि। अस्याः कृते मह्यं शक्तिं सामर्थ्यं च प्रयच्छतु। मह्यम् असत्यात् दूरं सत्यस्य च समीपं गन्तुं आशीर्वादं

प्रयच्छतु । सत्यमेव, एतत्सर्वम् अस्माकं कृते गौरवास्पदं वृत्तमस्ति। अहं श्रीमन्तं चन्द्रिकाप्रसाद- संतोखी-महोदयं वर्धापयामि, स्वीय-राष्ट्रस्य सेवायै च त्रिंशदुत्तरैकशतकोटि-जनानां पक्षतः तस्मै शुभकामनाः व्याहरामि।

मम प्रियाः देशवासिनः, एषः वर्षाकालः अस्ति। विगतवारमपि मया भवद्भ्यः कथितमासीद् यत् वर्षासु पारुष्येण, तया चोद्भूयमानानां रोगाणाम् आशंका अधिकतरा जायते। चिकित्सालयेषु सम्मर्दः अभिवर्धते- इति कृत्वा भवद्भिः स्वच्छताविषये अधिकतरावधानं प्रदेयम् । रोगप्रतिरोधक- क्षमतावर्धकानां पदार्थानां क्वाथ- इत्यादीनां सेवनं करणीयम् । कोरोना-संक्रमणकाले वयम् अन्यरोगेभ्यः दूरे एव भवेम । अस्माभिः चिकित्सालयगमनस्य आवश्कतता न भवेदित्येतत्कृते समग्रावधानं प्रदेयं।

सखायः, वर्षतौं देशस्य बृहद्भागः प्लावनेनापि त्रस्तः अस्ति। बिहार-असम-सदृशानां राज्यानां नैकेषु क्षेत्रेषु जलप्लावनेन प्रभूतसमस्याः उत्पादिताः । एकतः तु कोरोना अस्ति, अपरतश्च एतादृशी समस्यास्ति । अस्यां स्थितौ सर्वैः प्रशासनैः, एन.डी.आर.एफ.दलानि, राज्य-आपदा-नियन्त्रण-दलानि, स्वयंसेविसंस्थाः च - सर्वैः सम्भूय एकतया सेवारताः सन्ति, आपत्सा-हाय्यसंरक्षाभियानेषु च निरताः सन्ति। अखिलराष्ट्रम् एतैः आपदादुष्प्रभावित-जनैः साकं सम्भूय स्थितमस्ति ।

सखायः, आगामिनि पर्याये, यदा वयं, 'मनोगत-'कार्यक्रमे मेलिष्यामः तदा, तत्पूर्वमेव ऑगस्ट-मासस्य पञ्चदश-दिनम् आगम्यमानमस्ति | क्रमेऽस्मिन् ऑगस्ट-मासस्य पञ्चदश-दिनम् अपि, पृथक्-परिस्थितिषु भविता - कोरोना-महामार्याः अस्याः आपदायाः मध्ये एव |

स्वीयान् युव-जनान्, सर्वान् अपि देशवासिनः च सानुरोधं कथयामि यत् वयं स्वतन्त्रता-दिवसावसरे, महामारीतो मुक्ति-प्राप्त्यर्थं संकल्पयाम, आत्मनिर्भरस्य भारतस्य च सङ्कल्पं स्वीकुर्मः, किञ्चित्-नवीनं अवगन्तुं, नवञ्च शिक्षितुं, शिक्षयितुञ्च, सङ्कल्पयाम, स्वीय-कर्त्तव्य-पालनस्य सङ्कल्पं करवाम |अस्माकं देशः साम्प्रतं यस्याम् उच्छ्रिततायां विराजते, तत्तु केवलम्, अनेकासां तादृशीनां महतीनां विभूतीनां तपस्या-कारणादेव, याः हि, राष्ट्र-निर्माण-हेतोः नैजं जीवनमर्पितवत्यः, तास्वेव महतीषु विभूतिषु अन्यतमास्ति- 'लोकमान्य-टिळकः' | वर्षेऽस्मिन् ऑगस्ट-मासे प्रथमे दिने लोकमान्य-टिळक-महोदयस्य शततमा पुण्यतिथिरस्ति |

लोकमान्य- टिळक-महोदयस्य जीवनम् अस्माकं सर्वेषां कृतेऽतितरां प्रेरणाप्रदं वर्तते । अस्मान् सर्वान् सुबहु शिक्षयति ।

आगामिनि पर्याये यदा वयं मेलिष्यामः, तदा पुनः सुबहु सम्भाषिष्यामहे, मिलित्वा किञ्चित् नवीनम् अवगमिष्यामः, तथा च सर्वैः साकं सम्विभाजयिष्यामः । भवन्तः सर्वे स्वीयावधानं सन्धारयन्तु, निज-कुटुम्बस्यापि अवधानं धारयन्तु, तथा च स्वस्थाः सन्तिष्ठन्तु । सर्वेभ्योऽपि देशवासिभ्यः आगम्यमानानां सर्वेषां पर्वणां कृते भूयोभूयः शुभकामनाः । बहवो धन्यवादाः ।

*****

[भाषान्तरम् – डॉ.श्रुतिकान्त-पाण्डेयेन सम्भूय बलदेवानन्द-सागर-द्वारा]

अणुप्रैषः - baldevanand.sagar@gmail.